॥ श्रीगोपीजनवल्लभाय नमः ॥

॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

जगद्गुरु-श्रीमद्-वल्लभाचार्य-विद्यालक्ष्मी-संवर्धन-सङ्कल्पः

जगद्गुरु-श्रीमद्-वल्लभाचार्य-वंशावतंसानां

पू. पा. गो. १०८ श्रीअनिरुद्धलाल-महाराजाणाम्

आज्ञया प्रकाशिता

विद्याविलासिभिः ब्रह्मसूत्रवृत्त्याद्यनेकग्रन्थकर्तृभिः श्रीजीवनजीमहाराजैः

विरचिता

महानुभावसद्रत्नमालिका

विशेषानुग्रहः

जगद्गुरु-श्रीमद्-वल्लभाचार्य-वंशावतंसाः पण्डितप्रकाण्डाः

पू. पा. गो. १०८ श्रीश्याममनोहर-महाराजाः

(पार्ला-किशनगढ़)

प्रकाशकम् :- श्रीगोवर्धनेश-प्रकाशन-मण्डलम् (मुम्बापुरी)

प्रथमसंस्करणम् : श्रीवल्लभाब्दः ५२८ - वि. सं. २०६२ - ई. स. २००५

प्रति-संख्या : १०००

निःशुल्कवितरणार्थम्

सम्पादकः : गोस्वामी गोकुलनाथः (मन्दारकुमारः), बृहन्मन्दिरम्

सहायः : श्रीगिरिशः बी. जानी

पत्रप्रेषणसङ्केतः :-

Shri Govardhanesh Prakashan Mandal

Administrator : Shri Bipinbhai Shah
Shop No. 41, 1st Bhoiwada,
H. H. Shri Gokulnathji Maharaj Lane,
Mumbai - 400 002.
Ph. : (022) 2242 1456 • Telefax : (022) 2242 1492
email : vedagaana@yahoo.com

: मुद्रकः

Creative Compugraphics

Nathalal Bhuvan, 3rd Floor,
133, V. P. Road, Mumbai - 4.
Ph. : (022) 2385 9603
www.geocities.com/utsava_02
email : ccg_nik@yahoo.com

अस्ति किञ्चित् वक्तव्यम्।

श्रीगुरुचरणानां कृपया मम दिष्ट्या च श्रीबृहन्मन्दिरस्य विद्याभण्डारतः श्रीजीवनजीमहाराजविरचितं **'महानुभावसद्रत्नमालिका'** नामकम् एतत् ग्रन्थरत्नं सम्प्राप्तम्। यद्यपि पुरा आस्थानविद्वांसः स्वमार्गीये संशोधनक्षेत्रे कृतभूरिपरिश्रमाः तथापि तैः अपि ग्रन्थस्य अस्य उल्लेखः कदापि, कुत्रापि कृतः आसीत् इति नैव भासते। अतः अहं भावयामि यद् एषा महदाश्चर्यजनका घटना अस्ति खलु भगवतः श्रीकृष्णचन्द्रस्य जीवबुद्ध्यगम्या काऽपि विचित्रा लीला एव, अन्यत् किम्?

अथापि, कतिपयवर्षेभ्यः प्राक् पण्डित-श्रीगट्टुलालाजी-महाराजस्य संस्थायाः ग्रन्थागारे प्रस्तुत-ग्रन्थकर्तुः श्रीजीवनजीमहाराजस्य एकम् अपरम् अप्रकाशित-ग्रन्थं दृष्टवान् आसम् परन्तु तत्रापि प्रस्तुत-ग्रन्थस्य नामोल्लेखोऽपि नैव लब्धः।

अधुना श्रीबालकृष्णप्रभोः कृपया विद्याभण्डारतः समुपलब्धं हस्तलिखित-पुस्तकत्रयम् (तेषु पुस्तकद्वयं पूर्णम् एकम् अपूर्णं चास्ति) आधारीकृत्य एषः उद्यमः।

ग्रन्थेऽस्मिन् सूक्ष्मरीत्या सरसभाषया च अस्माकं पूर्वाचार्याणां यशोगानं निरूपितम् अस्ति। अतः प्रस्तुत-ग्रन्थस्य कर्तुः विद्वत्तायाः विषये किमपि लिखितुं अहं नार्हः। महानुभावसद्रत्नमालिका-कारस्य अस्य महानुभावस्य श्रीजीवनजीमहाराजस्य इयं लघुरचना तु तदीयप्रोद्भटपाण्डित्यस्य समीचीना उद्घोषिका अस्ति।

एवमेव यदि भगवान् वल्लभाचार्यः कृपाप्रसादं ददाति तर्हि अधिकाः अप्रकाशित-विषयाः अस्यां ग्रन्थशृङ्खलायां संस्कृताभिमानिजनानां प्रमोदाय प्रकाशयितुं शक्यन्ते। कार्येऽस्मिन् विबुधैः साकं भक्तजनानां सहभागिता नितरामपेक्षिता अस्ति। रीत्या अनया धर्मानुरागिणः शिष्यजनाः स्वमार्गीय-साहित्यवैभवम् यदि अवलोकयन्ति तर्हि तेषां हृदि गुरुभक्तिः निश्चयेन वर्धिष्यति इति विश्वसिम्यहम्।

स्वात्मानम् अनुग्राहयितुं वयं पुनः-पुनः स्वमार्गीय-संस्कृत-साहित्यं प्रकटीकर्तुम् उद्युक्ताः भवेम इत्याशास्महे।

इति शम्।

-गोकुलनाथः

* चतुर्थं हस्तलिखितपुस्तकम् (अन्तिमपृष्ठरहितं) अपि सम्प्राप्तम्। तदपि प्रमाणरूपेण एव स्वीकृतम्।

॥ श्रीबालकृष्णाय नमः ॥

॥ महानुभावसद्रत्नमालिका ॥

नत्वा श्रीवल्लभाचार्यान् सपुत्रान् विट्ठलेश्वरान् ॥
गुरून् पित्रोः पदाम्भोजं बालकृष्णं मम प्रभुम् ॥१॥

हृदयध्वान्तनाशाय भगवच्छ्रीविवृद्धये ॥
महानुभावसद्रत्नमालिकेयं विरच्यते ॥२॥

श्रीयज्ञनारायणनामधेयो वेदावतारः परमप्रभावः ॥
यद्यज्ञकुण्डाद्धरिराबभाषे वंशे त्वदीये भवितास्म्यथेति ॥३॥

सद्वर्त्तिकसुपात्रस्य कृष्णवर्त्माश्रितस्य च ॥
तैलङ्गतोत्तमरुचेर्युक्ता स्वकुलदीपता ॥४॥

भारद्वाजाख्यगोत्रे यः समुत्पन्नोऽतिनिर्मले ॥
अधीता येन शाखा च तैत्तिरीया सुपेशला ॥५॥
आपस्तम्बं यस्य सूत्रं प्रसिद्धं यस्योपाख्या वेलनाटीति रम्या ॥
यः श्रीविष्णुं सोमयागैः समिज्य कूटस्थत्वं तस्य लेभे दुरापम् ॥६॥
सप्तस्वरूपेषु च सप्तमो यः श्रीमारमोहाह्वयतः प्रसिद्धः ॥
स सेवितो येन विशुद्धभक्त्या गोपालमन्त्रेण सुदीक्षितेन ॥७॥
गङ्गाधरस्तनयस्स साक्षाद्गङ्गाधरः श्रीहरिभक्तिवर्यः ॥
तत्पुत्र आसीद्गणनाथनामा गुणे तादृक्ष उदारबुद्धिः ॥८॥
तदङ्गजातः प्रथितप्रभावो विद्यानिधिर्वल्लभभट्टशर्मा ॥
श्रीकृष्णभक्तो द्विजराजवर्यो ज्ञानी च कर्मी विबुधोपमो यः ॥९॥

तदात्मजः सर्वगुणैः प्रसिद्धः श्रीलक्ष्मणाख्योऽक्षररूप आद्यः ॥
श्रीरामकृष्णस्तनयस्तदीयः श्रीरामचन्द्रश्च कविः अतीयान् ॥१०॥

तयोश्च मुक्तोत्तमयोर्हि मध्ये मण्युत्तमः श्रीहरिमुख्यवह्निः ॥
श्रीवल्लभाख्योऽवततार तत्र यो यज्ञकुण्डात् प्रथमं बभाषे ॥११॥

शरगुणपाण्डवशशधरमितवर्षे विक्रमस्य वैशाखे ॥
कृष्णैकादश्यामिह चम्पारण्येऽथ सौम्यवारयुजि ॥१२॥

श्रीलक्ष्मणाह्वान्वयमत्युदारं तीर्थं विधातुं य उपात्तदेहः ॥
तं स्तोतुमर्हः क इहास्ति साक्षाच्छेषोऽपि नेशः किमुतैकजिह्वः ॥१३॥

तच्छ्रीमदाचार्यवरस्य पादपद्मं नमाम्युत्तममानसस्थम् ॥
हंसैर्निषेव्यं सरसं च नित्यमामोददं श्रीनिलयं सरागम् ॥१४॥

नित्योदयः पुष्टिपथप्रकाशी श्रीलक्ष्मणाह्वान्वयमण्डलस्थः ॥
पाषण्डवाग्ध्वान्तविनाशको यः श्रुत्यब्जखण्डस्य विकासकोऽस्ति ॥१५॥

तं श्रीवल्लभमार्त्तण्डं रिपुरात्रिविनाशकम् ॥
सच्चक्रवाकसंयोगसुखदं प्रणतोऽस्म्यहम् ॥१६॥

तज्ज्येष्ठपुत्रोऽथ बभूव गोपीनाथाह्वयः श्रीबलदेवरूपः ॥
श्रीमांस्तनूजः पुरुषोत्तमोऽभूत्तस्य ध्रुवं वस्तुतया स एव ॥१७॥

श्रीवल्लभस्याऽथ कनिष्ठपुत्रः श्रीविट्ठलः श्रीहरिरेव साक्षात् ॥
तद्वंशदुग्धोदधिचन्द्रवर्यो दैवोद्धृतौ योऽतिकृतप्रयत्नः ॥१८॥

ईक्षणस्वरबाणेन्दुमिते वर्षेऽथ वैक्रमे ॥
पौषकृष्णनवम्यां स प्रादुरासीद्भृगौ शुभे ॥१९॥

यः पुण्डरीकाख्यपुरे स्थितोऽपि स्वेच्छावशाद्वल्लभपुत्ररूपः ॥
श्रीरुक्मिणीति प्रथमाऽस्य पत्नी पद्मावती पद्मगृहैव साऽन्या ॥२०॥

सप्ताऽभवंस्तत्तनुजाः प्रसिद्धा नामानि तेषां कथयाम्यथाऽहम् ॥
गुणांश्च कर्माणि न वक्तुमर्होऽनन्तान्यनन्तोऽपि सहस्रवक्त्रः ॥२१॥

श्रीगिरिधर उरुसुखदो गोविन्दो बालकृष्ण इति नाम्ना ॥
गोकुलपतिरघुनाथौ यदुनाथः सौख्यदः सतां सततम् ॥२२॥

एते षट् श्रीरुक्मिण्युदराकरसम्भवा महामणयः ॥
पद्मावतीतनूजो गुणगणयुक्तो घनश्यामः ॥२३॥

तेषु प्रथमः श्रीमान् गिरिधर इति यः प्रकीर्तितस्तस्य ॥
मुरलीधरदामोदरगोपीनाथास्त्रयोऽभवंस्तनयाः ॥२४॥

तत्त्रितये देवत्रय इव मध्यस्थो महाराजः ॥
श्रीदामोदरसञ्ज्ञस्तत्पुत्रः श्रीहरेः प्रियोऽनर्घ्यः ॥२५॥
श्रीमद्विट्ठलरायो यज्जन्माऽभूत् सुयाचनया महतः ॥
श्रीगिरिधराह्वयस्य श्रीशो न्यदधात् करं शिरसि यस्य ॥२६॥
चत्वारस्तनयास्तस्य बभूवुः ख्यातकीर्त्तयः ॥
पुमर्था इव तेष्वासीत्तुरीयः सर्ववाञ्छितः ॥२७॥
श्रीवल्लभाभिधः श्रीमान् विद्याब्धिर्ग्रन्थकृद् भृशम् ॥
तस्य सप्ताऽभवन् पुत्रा विट्ठलस्येव सद्गुणाः ॥२८॥
तेषु ज्येष्ठो महाराजः श्रीमद्गिरिधराभिधः ॥
पुत्रद्वयमभूत्तस्य तयोर्ज्येष्ठो महाप्रभुः ॥२९॥

विट्ठलेश इति श्रीमांस्तत्पुत्रो द्वारकेश्वरः ॥
विद्याब्धिः सद्गुणाढ्योऽमेयो मन्त्रे परमो गुरुः ॥३०॥

तस्याऽभवत् सुतद्वन्द्वं विख्यातं तत्र विश्रुतः ॥
द्वितीयोऽप्यद्वितीयोऽभूच्छ्रीमद्दामोदराभिधः ॥३१॥

शिक्षणाय हि लोकस्य लीलासौख्यानुभूतये ॥
स्थितः श्रीगोकुले शश्वत्कालिन्दीतटमण्डने ॥३२॥

कृष्णवर्त्मत्रयमिव तस्य पुत्रत्रयं शुभम् ॥
अभवत्प्रथमस्तत्र विद्वान् श्रीशसमर्चकः ॥३३॥

श्रीमद्विट्ठलरायो ब्रजरमणाख्यस्तृतीय उभयोस्तु ॥
मध्ये सर्वगुणाढ्यो ज्योतिर्विद्धैर्यधृत्परमरुचिरः ॥३४॥

श्रीगोकुलोत्सवाख्यो वस्तुतया गोकुलोत्सवः श्रीमान् ॥
मज्जनकस्तद्दासोऽहं ख्यातो जीवनाभिधो लोके ॥३५॥

श्रीवल्लभाभिधानो विट्ठलरायात्मजश्चतुर्थो यः ॥
पूर्वोक्तस्तस्याऽऽसन् सप्त सुतास्तेषु सप्तमः श्रीमान् ॥३६॥

श्रीगोकुलनाथाख्यस्तस्य द्वावात्मजौ विपुलकीर्त्तीं ॥
ज्येष्ठस्तयोरुदारो मथुरानाथो महाराजः ॥३७॥

सर्वज्ञः सर्वविद्याढ्यो जिता येनाऽतिदुर्मदाः ॥
पाषण्डिनः पण्डिताश्च विद्याबलवशाद्बहु ॥३८॥

शकटं पुस्तकस्याऽऽसीत्तस्योपरि महाध्वजः ॥
देशाटनविधावस्य घृताक्ता करदीपिका ॥३९॥

भाष्यप्रकाशान्तरादिग्रन्था येन विनिर्मिताः ॥
द्वादशाब्दमितं कालं काश्यामध्ययनं कृतम् ॥४०॥
श्रीमद्विट्ठलरायाख्यः कनिष्ठस्तस्य सोदरः ॥
तस्य ज्येष्ठात्मजः श्रीमान् बालकृष्णः कृपानिधिः ॥४१॥
सेवितो येन देहेन द्रव्येण मनसाऽप्यथ ॥
श्रीबालकृष्णः सततं यशोदोत्सङ्गलालितः ॥४२॥
यः पुरा वल्लभाचार्यैः सेवितश्च ततः परम् ॥
तच्छिष्यया क्षत्रियया रज्जोसञ्ज्ञिकयाऽनिशम् ॥४३॥
गोवर्द्धनाद्रिनिकटे स्थितिस्तस्य महात्मनः ॥
तस्याऽनुजो महाराजो गिरिधारी प्रतापवान् ॥४४॥

श्रीबालकृष्णनेदिष्ठः श्रीमन्मदनमोहनः ॥
सेवितो येन सप्रेम श्रीमद्विट्ठलसेवितः ॥४५॥
श्रीमन्मथुरानाथो गोकुलनाथात्मजस्तु पूर्वोक्तः ॥
चत्वारस्तनुजातास्तस्याऽऽसँल्लोकविश्रुताः प्रभवः ॥४६॥
ज्यायान् गिरिधरसञ्ज्ञः शस्त्रास्त्रज्ञो गुणाकरस्तत्र ॥
मुरलीधरो द्वितीयो वस्तुतयाऽऽस्ते स एव तादृक्षः ॥४७॥
रामत्रये तृतीयः सुभगः खलदण्डको बलसमाख्यः ॥
श्रीमद्गोकुलनाथस्तेषु तृतीयस्तथाविधोऽघहरः ॥४८॥
नागरेत्यपराभिख्यः श्रीमन्मदनमोहनः ॥
श्यामलो विट्ठलाधीशसेवितः सुन्दराकृतिः ॥४९॥

प्रेम्णा निषेवितः शश्वत् स येन सुखदः सताम् ॥
तत्प्रभावं न शक्तोऽहं प्रवक्तुं स्वल्पबुद्धितः ॥५०॥

चण्डपाषण्डशुण्डालखण्डने चण्डविक्रमम् ॥
पापध्वान्तप्रचण्डांशुं तं वन्दे गोकुलेश्वरम् ॥५१॥

तस्य पुत्रोऽतितेजस्वी बालश्चट्टसमाह्वयः ॥
बाललीलारतः श्रीमद्बालकृष्णप्रियः सदा ॥५२॥

श्रीमन्मथुरानाथो गोकुलनाथात्मजस्तु पूर्वोक्तः ॥
तस्य चतुर्थस्तनुजः श्रीहरिरेव द्विजेन्द्ररूपोऽस्ति ॥५३॥

श्रीगोवर्द्धनजीति प्रथिताऽभिख्याऽस्ति यस्य लोकेषु ॥
तस्य यशःश्रीसद्गुणविद्याविनयादि वक्तुमीशः कः ॥५४॥

श्रीवामनादिरूपैः प्राग्ब्राह्मण्यं निजं कृतं पश्चात् ॥
राघवयदुवरपूर्वै रूपैः क्षात्रञ्च विष्णुना कृपया ॥५५॥
श्रीवल्लभरूपेण ह्याचार्यत्वं निजं कृतं तदनु ॥
ब्राह्मण्यं वाणिज्यमाचार्यत्वं च वैष्णवत्वमहो ॥५६॥
श्रीगोवर्द्धनरूपेण स्वीकृतं स्वेच्छया ततः ॥
शुचिता च समृद्धिश्च धर्मो भक्तिः स्थिरीकृताः ॥५७॥
श्रीमन्मोहमयीपुरे प्रविततते रम्ये स्वसद्माऽद्भुतम् ॥
कृत्वा बालहरिः प्रभुः प्रबलतः प्रेम्णाऽनिशं सेव्यते ॥
श्रौतस्मार्तविधिः कलौ बहुतरं सार्थीकृतो येन तम् ॥
श्रीगोवर्द्धननामधेयवसुधावृन्दारकेन्द्रं भजे ॥५८॥

दानाच्चार्द्रकरः श्रीमान् गजेन्द्रः इव सर्वदा ॥
महेन्द्र इव योऽजस्रं विबुधैः परिषेवितः ॥५९॥

कोशवृन्दं गृहं चास्य सुवर्णाढ्यं निरन्तरम् ॥
चित्रं दुर्वर्णनिचयः पात्रत्वं तत्र लम्भितः ॥६०॥

यस्याश्रिताः समृद्धा रत्नाकरतां गतास्तथा कोशाः ॥
श्रीशो यस्योत्सङ्गे तत्समृद्धिं भाषितुं समर्थः कः ॥६१॥

क्षोणीन्द्रकोटिमुकुटोज्ज्वलरत्नराजिचित्रांशुचित्रितपदाब्जनिधानपीठः ॥
गोवर्द्धनो गुरुवरो निजकीर्तिपुञ्जैः शुभ्रीचकार दिगिभानपि किं बहूक्त्या ॥६२॥

बहुगोदानविधाता पात्रापात्राविचारतः सूर्यः ॥
पुनरादानाल्लोके क्षयिताऽस्तमयः प्रयाति न स्थिरताम् ॥६३॥

गोवर्द्धनस्सुदाता पात्रापात्रज्ञतायुतः श्रीमान् ॥
कृत्वा बहुगोदानान्यक्षय्यत्वं स्थिरत्वमाप्तोऽस्ति ॥६४॥

अज्ञानान्धजनानां ज्ञानेक्षणदः क्षणेन निजभक्तम् ॥
संसारार्णवमग्नं द्रागुद्धर्तुं समर्थ इहलोके ॥६५॥

पातकबलनलसङ्घे सानिलदावानलोपमं यस्य ॥
सघृणेक्षणं निजानां दुःखदवाग्नेः प्रशामको मेघः ॥६६॥

ईदृग्बहुविधगुणगणगणनां गणनायको न कर्त्तुमलम् ॥
तस्याहं क्षोदीयान् बुद्ध्या किं वर्णयामि गुणवृन्दम् ॥६७॥

अस्यात्मजः प्रसिद्धः सौन्दर्यौदार्यधैर्यधृक् सुज्ञः ॥
श्रीविट्ठलेशसञ्ज्ञः सद्गुणविद्यानिधिः कलाकुशलः ॥६८॥

श्रीविट्ठलावतारो भक्ताधारोऽतिदुर्ल्लभां भक्तिम् ।।
दिशति स्वीयजनेभ्यः सर्वार्थस्याभिसिद्धये कृपया ।।६९।।

श्रीमन्नवनीतप्रिय उद्भटभावेन सेवितस्तेन ।।
यः श्रीविट्ठलसेवकवाघाजीक्षत्रियस्य गृहे आसीत् ।।७०।।

महात्मनोऽस्याप्रमितस्य चाहं धर्मानुजो धर्मसुतोऽस्मि तस्य ।।
गोवर्द्धनाख्यस्य सदैशिकोऽपि शिष्योऽस्मि तेनास्य गुरोः कृपाब्धेः ।।७१।।

जीवनेति प्रसिद्धस्य जगन्नाथाह्वयस्य मे ।।
मार्गशीर्षे सिते पक्षे पञ्चम्यां भौमवासरे ।।७२।।

रसवसुगजधरणीमितविक्रमवर्षे मयूरमय्यां वै ।।
पुरि हालारे देशे जन्माऽभूद्रात्रितुर्ययामे च ।।७३।।

पूर्वोक्तः श्रीबालकृष्णः श्रीमन्मदनमोहनः ॥
नवनीतप्रियः श्रीमान् श्यामलो मारमोहनः ॥७४॥

त एते प्रभवो नित्यं मोहमय्याख्यपत्तने ॥
सेव्यन्तेऽत्र मयैकत्र गोवर्द्धनकृपाबलात् ॥७५॥

तेन मया रचितोऽयं ग्रन्थस्स्वरदृग्ग्रहक्षितिमितेऽस्मिन् ॥
विक्रमवर्षेऽष्टम्यां कार्त्तिककृष्णे चन्दिरे वारे ॥७६॥

॥ इति श्रीमद्वल्लभाचार्यकुलोद्भवश्रीजीवनेशकृतौ महानुभावसद्रत्नमालिका सम्पूर्णा ॥

वसुनेत्रनन्दशशधरमितवर्षे विक्रमस्य वैशाखे कृष्णे पक्षे खानलमितदिवसे भौमवारयुते
श्रीगोस्वामिकुलोद्भवजीवनजीशिष्यरत्नबधिरेण पुस्तकमिदं व्यलेखि काश्यां तस्य प्रभोरनुज्ञातः ॥

॥ श्रीकृष्णार्पणमस्तु ॥

॥ शुभम् ॥